# शब्दविमर्शः - खच्प्रत्ययान्तशब्दानामवलोकनम्।

डा. वि. आर्. मनोजः, उपनिदेशकः, चिन्मयशोधसंस्थानम्

## परन्तपः ।

रकारादीनि नामानि वित्रासं जनयन्ति मे इति रामत्रस्तो मारीचो वदति। रकारादीनि नामानीति कथम् ? रेफादीनीति खलु भवितव्यम् ! 'वर्णात्कारः' (3.2.108-वा.3) इति कारप्रययः सामान्येन विहितः। तेन अकार इकार उकारो मकार इत्येवमादयः प्रयोगाः सिद्ध्यन्ति। ततो 'रादिफः' (3.2.108-वा.4) इति विशेषेण विहितम्। अतः रकार इति न साम्प्रतम्। प्रत्युत रेफ इति प्रयुञ्जीयात्। कथं तर्हि रामायणेऽयं प्रयोगः साधीयान् भवितुमर्हतीति चेत् ऋषिप्रोक्तमिति कृत्वा साधुत्वमन्वाख्येयम्। अथवा व्याकरणान्तरेषु साधुत्वं मृग्यम्। तदास्तां क्व रामायणे पद्यमिदमुपलब्धं भवता इति चेत्समासेन सन्दर्भं वक्ष्यामि। श्रूयताम् -

जनस्थाने खरदूषणादीनां राक्षसानां हननसमये कथञ्चित्पलायितः अकम्पनः रावणम् अभयं ययाचे। ततः सलक्ष्मणं रामं हन्तुं विनिर्जिगमिषुं रावणं रामस्य पराक्रमं वर्णयन् परिहरति। ततो रामस्य सर्वस्वं सीतेत्युक्त्वा सीतामुपवर्ण्य सीताया अभावे रामो न जीविष्यतीत्यतः सीतापहरणं हि रामवधोपाय इति रावणमुपादिशत्। एवम् अकम्पनप्रेरितो रावणः सीतापहरणे मतिं दधे। अयं हि आद्यो बीजावापो रावणमनसि सीतापहरणाय।

पुनश्च शूर्पणखाचोदितो रावणः मारीचं गच्छति। कथं चोदितः? सीतायाः सर्वातिशायिनं सौन्दर्यमुपवर्ण्य त्वदर्थं तामिहानेतुं यतमानाया ममाङ्गानि लक्ष्मणो न्यकृन्तदिति रावणमनसि भगिनीगतां दयां रामलक्ष्मणयोः विषये क्रोधं ततः तद्रूपसौष्ठमवमुपवर्ण्य मन्मथञ्चोदभावयत्। किञ्च सीताया सर्वातिशायिनः सौन्दर्यस्य भोक्ता त्वत्तो नान्यो भवितुमर्हतीति गर्वञ्चोद्भावितवती।

विधेर्विधानं बहुधा समीक्ष्यताम् ! विधिविहितः पूर्वसन्नाहः आश्चर्यावहः। कुत एवं ब्रवीति ? अकृतास्त्रेण बालेनाक्लिष्टकर्मणा रामेण शतं योजनाः मारीचः समुद्रे व्यक्षिपि। सहचराः सर्वे हताः। पश्चात्तस्यैव मारीचस्य उपयोगो भविष्यतीति जानन्निव तं तदानीमहत्वा तत्याज। अस्य महतो नाटकस्य रचयिता संविधाता च विधिः। अयं विधिः प्रत्येकस्य पात्रस्य कृते कमपि नाटनीयं कथांशं विदधाति। तं तं कथांशं नाटयित्वा तमितो रङ्गपटादपसारयति। मारीचवत्।

पुनरप्यसौ मारीचः भयङ्करस्य हिंस्रजन्तोः रूपेण मृगरूपधारिभ्यां राक्षसाभ्यां सहितः दण्डकारण्यं प्रविष्टः। तत्रासौ रामं वैदेहीं लक्ष्मणञ्चासादयत्। स च मारीचः महाबलं रामं परिभूय तापसोऽयमिति ज्ञात्वा पूर्ववैरमनुस्मरन् सुसंक्रुद्धस्तीक्ष्णश्रृङ्गो मृगाकृतिः अभ्यधावत। तदा रामेण त्यक्तास्त्रयो बाणाः। किन्तु रामस्य पराक्रमज्ञो दृष्टभयो मारीचः समुत्क्रान्तस्ततो मुक्तः। तावुभौ राक्षसौ हतौ। एवं रामस्य शरेण मुक्तः कथञ्चिज्जीवितं प्राप्य इह प्रव्राजितस्तापसोऽहं समाहित इति रावणमुक्त्वा पुनराह - अपि रामसहस्राणि भीतः पश्यामि रावण। रामभूतमिदं सर्वमरण्यं प्रतिभाति मे।। रकारादीनि नामानि रामत्रस्तस्य रावण। रत्नानि च रथाश्चैव वित्रासं जनयन्ति मे।। इति।

घट्टकुटीप्रभातन्यायेन अत्रैव परिसर्प्य प्राप्ताः। रकारादीनीति यत्र आरब्धम्। अये महान् कालोऽतिवाहितो भवता कथाकथनेन। व्याकरणं खल्वध्येतव्यम्। मा स्म तपत्। किमर्थं व्याकरणमध्येष्यामहे यदि रामकथांशस्यास्वादो न विदधाति तद्व्याकरणम् ? अतः कथां श्रुत्वा व्याकरणमधीमहे। तच्छ्रूयताम् -

'द्विषत्परयोस्तापेः' (3.2.39) इति सूत्रेण द्विषत् पर इत्येतयोः कर्मणोरुपपदयोः 'तप सन्तापे' (भ्वा.985), 'तप दाहे' (भ्वा.1819) इत्यनयोर्धात्वोः खच्प्रत्ययो विहितः। तयोः द्विषन्तपशब्दः पूर्वमुपात्तः। परन्तपशब्दः उदाहरिष्यते।

भट्टिकाव्यस्य प्रारम्भ एव विष्णोरवतारकथाप्रस्तावप्रसङ्गे परन्तपशब्दः प्रयुक्तो दृश्यते। अभून्नृपो विबुधसखः परन्तपः श्रुतान्वितो दशरथ इत्युदाहृतः। गुणैर्वरं भुवनहितच्छलेन यं सनातनः पितरमुपागमत्स्वयम्।। (भट्टिकाव्यम् 1.1)। देवसखा शत्रुसंहारकः अधीतसर्वविद्यः दशरथ इति नाम्ना विख्यातो राजा अभवत्। दयादाक्षिण्यादिभिः गुणैः श्रेष्ठं तं नृपं सनातनो विष्णुः शिष्टानुग्रहदुष्टनिग्रहादिना लोकोपकारव्याजेन जनकं आत्मना एव उपजगामेति भावः। अत्र उच्छेदनीयोपपीडनीयकर्षणीयाश्शत्रवः परशब्दवाच्याः। अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः इत्यमरः। परांस्तापयतीति परन्तपः। परोपपदपूर्वकात् तप सन्तापे इति णिजन्ताद्धातोः 'द्विषत्परयोस्तापेः' (3.2.39) इति खच्प्रत्ययः। 'खचि ह्रस्वः' (6.4.94) इत्युपधाह्रस्वत्वम्। 'अरुर्द्विषदजन्तस्य मुम्' (6.3.67) इति मुमागमः। 'उपपदमतिङ्' (2.2.19) इत्युपपदसमासः।

उदाहरणान्तरमलोक्यतां रघुवंशे इन्दुमतीस्वयंवरप्रसङ्गे मगधेश्वरस्य गुणगणान् वर्णयति प्रतिहाररक्षी - असौ शरण्यः शरणोन्मुखानामगाधसत्त्वो मगधप्रतिष्ठः। राजा प्रजारञ्जनलब्धवर्णः परन्तपो नाम यथार्थनामा।। इति (रघुवंशम् 6.21)। असौ मगधेश्वरो राजा शरणार्थिनां शरण्यः। गम्भीरस्वभावः। सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः इति विश्वः। प्रजारञ्जने लब्धोत्कर्षः। पराञ्छत्रूंस्तापयतीति परन्तपः परन्तपाख्यः। नामेति प्रसिद्धौ। यथार्थनामा शत्रुसन्तापनादिति भावः। प्राग्वत्प्रक्रिया ज्ञेया।

अन्यत्र रघुवंश एव लवणासुरवधाय शत्रुघ्नस्य प्रस्थानप्रसङ्गे - यः कश्चन रघूणां हि परमेकः परन्तपः। अपवाद इवोत्सर्गं व्यावर्तयितुमीश्वरः।। (रघुवंशम् 15.7)। पराञ्छत्रूँस्तापयतीति परन्तपः। यथा व्याकरणशास्त्रे विशेषशास्त्रं सामान्यशास्त्रस्य निवर्तकं भवति तद्वत् रघूणां मध्ये यः कश्चैनेकः परन्तपः। अर्थाद् परं शत्रुं तापयितुं व्यावर्तयितुं समर्थ इत्यर्थः। अतः शत्रुघ्नमेवादिदेशेति पूर्वतनपद्येनेहान्वयः।

ननु कथं परम्पराशब्दः यतो ह्यत्र परशब्दो दृश्यते परन्तपशब्दवच्च श्रूयते ? नहि। परं पृणातीत्यर्थे अच्प्रत्ययान्तोऽयं शब्दः।